# Shri Natesha Stava

# શ્રીનટેશસ્તવઃ

## Document Information

Text title : Shri Natesha Stava 06 23

File name : naTeshastavaH.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-23

Latest update : September 18, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 19, 2021

*sanskritdocuments.org*

# શ્રીનટેશસ્તવઃ

હ્રીમત્યા શિવયા વિરાણમયમજં હૃત્પઙ્કજસ્થં સદા
  હ્રીણાના શિવકીર્તને હિતકરં હેલાહૃદા માનિનામ્ ।
હોબેરાદિસુગન્ધવસ્તુરુચિરં હેમાદ્રિબાણાસનં
  હ્રીઙ્કારાદિકપાદપીઠમમલં હૃદ્યં નટેશં ભજે ॥ ૧॥

શ્રીમજ્જ્ઞાનસભાન્તરે પ્રવિલસચ્છ્રીપઞ્ચવર્ણાકૃતિ
  શ્રીવાણીવિનુતાપદાનનિચયં શ્રીવલ્લભેનાર્ચિતમ્ ।
શ્રીવિદ્યામનુમોદિનં શ્રિતજનશ્રીદાયકં શ્રીધરં
  શ્રીચક્રાન્તરવાસિનં શિવમહં શ્રીમન્નટેશં ભજે ॥ ૨॥

નવ્યામ્ભોજમુખં નમજ્જનનિધિં નારાયણેનાર્ચિતં
  નાકૌકોનગરીનટીલસિતકં નાગાદિનાલઙ્કૃતમ્ ।
નાનારૂપકનૃત્તનાદિચતુરં નાલીકજાન્વેષિતં (નર્તનાદિચતુરં)
  નાદાત્માનમહં નગેન્દ્રતન્યાનાથં નટેશં ભજે ॥ ૩॥

મધ્યસ્થં મધુવૈરિમાર્ગિતપદં મદ્વંશનાથં પ્રભું
  મારાતીતમતીવ મઞ્જુવપુષં મન્દારગૌરપ્રભમ્ ।
માયાતીતમશેષમઙ્ગલનિધિં મદ્ભાવનાભાવિતં
  મધ્યેવ્યોમસભાગુહાન્તમખિલાકાશં નટેશં ભજે ॥ ૪॥

શિષ્ટૈઃ પૂજિતપાદુકં શિવકરં શીતાંશુરેખાધરં
  શિલ્પં ભક્તજનાવને શિથિલિતાઘૌઘં શિવાયાઃ પ્રિયમ્ ।
શિક્ષારક્ષણમમ્બુશા સનશિરોબં હારશીલપ્રભું (રક્ષણમમ્બુજા સનશિરસ્સં)
  શીતાપાઙ્ગવિલોચનં શિવમહં શ્રીમનટેશં ભજે ॥ ૫॥

વાણીવલ્લભવન્દ્યવૈભવયુતં વન્દારુચિન્તામણિં
  વાતાશાધિપભૂષણં પરકૃપાવારાન્નિધિં યોગિનામ્ ।
વાઞ્છાપૂર્તિકરં બલારિવિનુતં વાહીકૃતામ્નાયકં
  વામઙ્ગાત્તવરાઙ્ગના મમ હૃદાવાસં નટેશં ભજે ॥ ૬॥ (વામઙ્ગાત્તવરાઙ્ગનં)

યક્ષાધીશસખં યમપ્રમથનં યામિન્યધીશાસનં
    યજ્ઞાધ્વંસકરં યતીન્દ્રવિનુતં યજ્ઞક્રિયાદીશ્વરમ્ ।
યાજ્યં યાજકરૂપિણં યમધનૈર્યત્નોપલભ્યાઙ્ઘ્રિકં
    વાજીભૂતવૃષં સદા હૃદિ મમાયત્તં નટેશં ભજે ॥ ૭॥ (યા જીભૂત)

માયાશ્રીવિલસચ્ચિદમ્બરમહાપઞ્ચાક્ષરૈરઙ્કિતાન્
    શ્લોકાન્ સપ્ત પઠન્તિ યેઽનુદિવસં ચિન્તામણીનામકાન્ ।
તેષાં ભાગ્યમનેકમાયુરધિકાન્ વિધ્યધ્વરાન્ સત્સુતાન્ (વિદ્વદ્વરાન્)
    સર્વાભીષ્ટમસૌ દદાતિ સહસા શ્રીમત્સભાધીશ્વરઃ ॥ ૮॥

ઇતિ શ્રીનટેશસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Gopalakrishnan

*Shri Natesha Stava*

pdf was typeset on September 19, 2021

Please send corrections to *sanskrit@cheerful.com*